# श्रीमद् भागवत रसिक कुटुंब

## विष्णुपादादिकेशांत स्तोत्र

लक्ष्मीभर्तुर्भुजाग्रे कृतवसति सितं यस्य रूपं विशालं
नीलाद्रेस्तुंगशृंगस्थितमिव रजनीनाथबिंबं विभाति ।
पायान्नः पांचजन्यः स दितिसुतकुलत्रासनैः पूरयन्स्वै--
र्निध्वानैर्नीरदौघध्वनिपरिभवदैरंबरं कंबुराजः ॥ 1 ॥

आहुर्यस्य स्वरूपं क्षणमुखमखिलं सूरयः कालमेतं
ध्वांतस्यैकांतमंतं यदपि च परमं सर्वधाम्नां च धाम ।
चक्रं तच्चक्रपाणेर्दितिजतनुगलद्रक्तधाराक्तधारं
शश्वन्नो विश्ववंद्यं वितरतु विपुलं शर्म धर्मांशुशोभम् ॥ 2 ॥

अव्यान्निर्घातघोरो हरिभुजपवनामर्शनाध्मातमूर्ते--
रस्मान्विस्मेरनेत्रत्रिदशनुतिवचःसाधुकारैः सुतारः ।
सर्वं संहर्तुमिच्छोररिकुलभुवन स्फारविष्फारनादः
संयत्कल्पांतसिंधौ शरसलिलघटावार्मुचः कार्मुकस्य ॥ 3 ॥

जीमूतश्यामभासा मुहुरपि भगवद्बाहुना मोहयंती
युद्धेषूद्धूयमाना झटिति तटिदिवालक्ष्यते यस्य मूर्तिः।
सोऽसिस्त्रासाकुलाक्षत्रिदशरिपुवपुःशोणितास्वादतृप्तो
नित्यानंदाय भूयान्मधुमथनमनोनंदनो नंदको नः ॥ 4 ॥

कम्राकारा मुरारेः करकमलतलेनानुरागाद्गृहीता
सम्यग्वृत्ता स्थिताग्रे सपदि न सहते दर्शनं या परेषाम् ।
राजंती दैत्यजीवासवमदमुदिता लोहितालेपनार्द्रा
कामं दीप्तांशुकांता प्रदिशतु दयितेवास्य कौमोदकी नः ॥ 5 ॥

यो विश्वप्राणभूतस्तनुरपि च हरेर्यानकेतुस्वरूपो
यं संचिंत्यैव सद्यः स्वयमुरगवधूवर्गगर्भाः पतंति।
चंचच्चंडोरुतुंडत्रुटितफणिवसारक्तपंकांकितस्यं
वंदे छंदोमयं तं खगपतिममलस्वर्णवर्णं सुपर्णम् ॥ 6 ॥

विष्णोर्विश्वेश्वरस्य प्रवरशयनकृत्सर्वलोकैकधर्ता
सोऽनंतः सर्वभूतः पृथुविमलयशाः सर्ववेदैश्च वेद्यः ।
पाता विश्वस्य शश्वत्सकलसुररिपुध्वंसनः पापहंता
सर्वज्ञः सर्वसाक्षी सकलविषभयात्पातु भोगीश्वरो नः ॥ 7 ॥

वाग्भूगैर्यादिभेदैर्विदुरिह मुनयो यां यदीयैश्च पुंसां

कारुण्यार्द्रैः कटाक्षैः सकृदपि पतितैः संपदः स्युः समग्राः।
कुंदेंदुस्वच्छमंदस्मितमधुरमुखांभोरुहां सुंदरांगीं
वंदे वंद्यामशेषैरपि मुरभिदुरोमंदिरामिंदिरां ताम् ॥ 8 ॥

या सूते सत्त्वजालं सकलमपि सदा संनिधानेन पुंसो
धत्ते या तत्त्वयोगाच्चरमचरमिदं भूतये भूतजातम् ।
धात्रीं स्थात्रीं जनित्रीं प्रकृतिमविकृतिं विश्वशक्तिं विधात्रीं
विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि ॥ 9 ॥

येभ्योऽसूयद्भिरुच्चैः सपदि पदमुरु त्यज्यते दैत्यवर्गैर्-
येभो धर्तुं च मूर्ध्ना स्पृहयति सततं सर्वगीर्वाणवर्गः।
नित्यं निर्मूलयेयुर्निचिततरममी भक्तिनिघ्नात्मनां
नःपद्माक्षस्यांघ्रिपद्मद्वयतलनिलयाः पांसवः पापपंकम् ॥ 10 ॥

रेखा लेखादिवंद्याश्चरणतलगताश्चक्रमत्स्यादिरूपाः
स्निग्धाः सूक्ष्माः सुजाता मृदुललिततरक्षौमसूत्रायमाणाः।
दद्युर्नो मंगलानि भ्रमरभरजुषा कोमलेनाब्धिजायाः
कम्रेणाम्रेड्यमानाः किसलयमृदुना पाणिना चक्रपाणेः ॥ 11 ॥

यस्मादाक्रामतो द्यां गरुडमणिशिलाकेतुदंडायमाना
दाश्च्योतंती बभासे सुरसरिदमला वैजयंतीव कांता ।

भूमिष्ठो यस्तथान्यो भुवनगृहबृहत्स्तंभशोभां दधौ नः
पातामेतौ पायोजोदरललिततलौ पंकजाक्षस्य पादौ ॥ 12 ॥

आक्रामद्भ्यां त्रिलोकीमसुरसुरपती तत्क्षणादेव नीतौ
याभ्यां वैरोचनींद्रौ युगपदपि विपत्संपदोरेकधामः।
ताभ्यां ताम्रोदराभ्यां मुहुरहमजितस्यांचिताभ्यामुभाभ्यां
प्राज्यैश्वर्यप्रदाभ्यां प्रणतिमुपगतः पादपंकेरुहाभ्याम् ॥ 13 ॥

येभ्यो वर्णश्चतुर्थश्चरमत उदभूदादिसर्गे प्रजानां
साहस्री चापि संख्या प्रकटमभिहिता सर्ववेदेषु येषाम्।
प्राप्ता विश्वंभरा यैरतिविततनोर्विश्वमूर्तेर्विराजो
विष्णोस्तेभ्यो महद्भ्यः सततमपि नमोऽस्त्वंघ्रिपंकेरुहेभ्यः ॥ 14 ॥

विष्णोः पादद्वयाग्रे विमलनखमणिभ्राजिता राजते या
राजीवस्येव रम्या हिमजलकणिकालंकृताग्रा दलाली।
अस्माकं विस्मयार्हाण्यखिलजनमन प्रार्थनीया हि सेयं
दद्यादाद्यानवद्या ततिरतिरुचिरा मंगलान्यंगुलीनाम् ॥ 15 ॥

यस्यां दृष्ट्वामलायां प्रतिकृतिममराः संभवंत्यानमंतः
सेंद्राः सांद्रीकृतेर्ष्यास्त्वपरसुरकुलाशंकयातंकवंतः।
सा सद्यः सातिरेकां सकलसुखकरीं संपदं साधयेन्नश्—

चंचच्चार्वंशुचक्रा चरणनलिनयोश्चक्रपाणेर्नखाली ॥ 16 ॥

पादांभोजन्मसेवासमवनतसुरव्रातभास्वत्किरीट–
प्रत्युप्तोच्चावचाश्मप्रवरकरगणैश्चिंतितं यद्विभाति ।
नम्रांगानां हरेर्नो हरिदुपलमहाकूर्मसौंदर्यहारिच् –
छायं श्रेयःप्रदायि प्रपदयुगमिदं प्रापयेत्पापमंतम् ॥ 17 ॥

श्रीमत्यौ चारुवृत्ते करपरिमलनानंदहृष्टे रमायाः
सौंदर्याढ्येंद्रनीलोपलरचितमहादंडयोः कांतिचोरे ।
सूरींद्रैः स्तूयमाने सुरकुलसुखदे सूदितारातिसंघे
जंघे नारायणीये मुहुरपि जयतामस्मदंहो हरंत्यौ ॥ 18 ॥

सम्यक्साह्यं विधातुं सममिव सततं जंघयोः खिन्नयोर्ये
भारीभूतोरुदंडद्वयभरणकृतोत्तंभभावं भजेते ।
चित्तादर्शं निधातुं महितमिव सतां ते समुद्गायमाने
वृत्ताकारे विधत्तां हृदि मुदमजितस्यानिशं जानुनी नः ॥ 19 ॥

देवो भीतिं विधातुः सपदि विदधतौ कैटभाख्यं मधुं चा–
प्यारोप्यारूढगर्वावधिजलधि ययोरादिदैत्यौ जघान ।
वृत्तावन्योन्यतुल्यौ चतुरमुपचयं बिभ्रतावभ्रनीला–
वूरू चारू हरेस्तौ मुदमतिशयिनीं मानसे नो विधत्ताम् ॥ 20 ॥

पीतेन द्योतते यच्चतुरपरिहितेनांबरेणात्युदारं
जातालंकारयोगं जलमिव जलधेर्बाडबाग्निप्रभाभिः।
एतत्पातित्यदान्नो जघनमतिघनादेनसो माननीयं
सातत्येनैव चेतोविषयमवतरत्पातु पीतांबरस्य ॥ 21 ॥

यस्या दाम्ना त्रिधाम्नो जघनकलितया भ्राजतेऽगं यथाब्धे–
र्मध्यस्थो मंदराद्रिर्भुजगपतिमहाभोगसंनद्धमध्यः ।
कांची सा कांचनाभा मणिवरकिरणैरुल्लसद्भिः प्रदीप्ता
कल्यां कल्याणदात्रीं मम मतिमनिशं कम्ररूपां करोतु ॥ 22 ॥

उन्नम्रं कम्रमुच्चैरुपचितमुदभूद्यत्र पत्रैर्विचित्रैः
पूर्वं गीर्वाणपूज्यं कमलजमधुपस्यास्पदं तत्पयोजम्।
यस्मिन्नीलाश्मनीलैस्तरलरुचिजलैः पूरिते केलिबुद्ध्या
नालीकाक्षस्य नाभीसरसि वसतु नश्चित्तहंसश्चिराय ॥ 23 ॥

पातालं यस्य नालं वलयमपि दिशां पत्रपंक्तीर्नगेंद्रा–
न्विद्वांसः केसरालीर्विदुरिह विपुलां कर्णिकां स्वर्णशैलम्।
भूयाद्गायत्स्वयंभूमधुकरभवनं भूमयं कामदं नो
नालीकं नाभिपद्माकरभवमुरु तन्नागशय्यस्य शौरेः ॥ 24 ॥

आदौ कल्पस्य यस्मात्प्रभवति विततं विश्वमेतद्विकल्पैः

कल्पांते यस्य चांत प्रविशति सकलं स्थावरं जंगमं च।
अत्यंताचिंत्यमूर्तेश्चिरतरमजितस्यांतरिक्षस्वरूपे
तस्मिन्नस्माकमंतःकरणमतिमुदा क्रीडतात्क्रोडभागे ॥ 25 ॥

कांत्यंभःपूरपूर्णे लसदसितवलीभंगभास्वत्तरंगे
गंभीराकारनाभीचतुरतरमहावर्तशोभिन्युदारे।
क्रीडत्वानद्धहेमोदरनहनमहाबाडबाग्निप्रभाढ्ये
कामं दामोदरीयोदरसलिलनिधौ चित्तमत्स्यश्चिरं नः ॥ 26 ॥

नाभीनालीकमूलादधिकपरिमलोन्मोहितानामलीनां
माला नीलेव यांती स्फुरति रुचिमती वक्त्रपद्मोन्मुखी या ।
रम्या सा रोमराजिर्महितरुचिकरी मध्यभागस्य विष्णो–
श्चित्तस्था मा विरंसीच्चिरतरमुचितां साधयंती श्रियं नः ॥ 27 ॥

संस्तीर्णं कौस्तुभांशुप्रसरकिसलयैर्मुग्धमुक्ताफलाढ्यं
श्रीवत्सोल्लासि फुल्लप्रतिनववनमालांकि राजद्भुजांतम् ।
वक्षः श्रीवृक्षकांतं मधुकरनिकरश्यामलं शार्ङ्गपाणेः
संसाराध्वश्रमार्तैरुपवनमिव यत्सेवितं तत्प्रपद्ये ॥ 28 ॥

कांतं वक्षो नितांतं विदधदिव गलं कालिमा कालशत्रो–
रिंदोर्बिंबं यथांको मधुप इव तरोर्मंजरीं राजते यः ।

श्रीमान्नित्यं विधेयादविरलमिलितः कौस्तुभश्रीप्रतानैः
श्रीवत्सः श्रीपतेः स श्रिय इव दयितो वत्स उच्चैःश्रियं नः ॥ 29 ॥

संभूयांभोधिमध्यात्सपदि सहजया यः श्रिया संनिधत्ते
नीले नारायणोरःस्थलगगनतले हारतारोपसेव्ये ।
आशाः सर्वाः प्रकाशा विदधदपिदधच्चात्मभासान्यतेजा–
स्याश्चर्यस्याकरो नो द्युमणिरिव मणिः कौस्तुभः सोऽस्तुभूत्यै ॥ 30 ॥

या वायावानुकूल्यात्सरति मणिरुचा भासमाना समाना
साकं साकंपमंसे वसति विदधती वासुभद्रं सुभद्रम् ।
सारं सारंगसंघैर्मुखरितकुसुमा मेचकांता च कांता
माला मालालितास्मान्न विरमतु सुखैर्योजयंती जयंती ॥ 31 ॥

हारस्योरुप्रभाभिः प्रतिनववनमालाशुभिः प्रांशुरूपैः
श्रीभिश्चाप्यंगदानां कबलितरुचि यन्निष्कभाभिश्च भाति ।
बाहुल्येनैव बद्धांजलिपुटमजितस्याभियाचामहे त–
द्वंधार्तिं बाधतां नो बहुविहतिकरीं बंधुरं बाहुमूलम् ॥ 32 ॥

विश्वत्राणैकदीक्षास्तदनुगुणगुणक्षत्रनिर्माणदक्षाः
कर्तारो दुर्निरूपस्फुटगुणयशसा कर्मणामद्भुतानाम् ।
शार्ङ्गं बाणं कृपाणं फलकमरिगदे पद्मशंखौ सहस्रं

बिभ्राणाः शस्त्रजालं मम दधतु हरेर्बाहवो मोहहानिम् ॥ 33 ॥

कंठाकल्पोद्गतैर्यः कनकमयलसत्कुंडलोत्थैरुदारै–
रुद्योतैः कौस्तुभस्याप्युरुभिरुपचितश्चित्रवर्णो विभाति ।
कंठाश्लेषे रमायाः करवलयपदैर्मुद्रिते भद्ररूपे
वैकुंठीयेऽत्र कंठे वसतु मम मतिः कुंठभावं विहाय ॥ 34 ॥

पद्मानंदप्रदाता परिलसदरुणश्रीपरीताग्रभागः
काले काले च कंबुप्रवरशशधरापूरणे यः प्रवीणः ।
वक्त्राकाशांतरस्थस्तिरयति नितरांदंततारौघशोभां
श्रीभर्तुर्दंतवासोद्युमणिरघतमोनाशनायास्त्वसौ नः ॥ 35 ॥

नित्यं स्नेहातिरेकान्निजकमितुरलं विप्रयोगाक्षमा या
वक्त्रेंदोरंतराले कृतवसतिरिवाभाति नक्षत्रराजिः ।
लक्ष्मीकांतस्य कांताकृतिरतिविलसन्मुग्धमुक्तावलिश्री–
र्दंताली संततं सा नतिनुतिनिरतानक्षतात्रक्षतान्नः ॥ 36 ॥

ब्रह्मन्ब्रह्मण्यजिह्मां मतिमपि कुरुषे देव संभावये त्वां
शंभो शक्र त्रिलोकीमवसि किममरैर्नारदाद्याः सुखं वः ।
इत्थं सेवावनम्रं सुरमुनिनिकरं वीक्ष्य विष्णोः प्रसन्न–
स्यास्येंदोरास्रवंती वरवचनसुधाह्लादयेन्मानसं नः ॥ 37 ॥

कर्णस्थस्वर्णकम्रोज्ज्वलमकरमहाकुंडलप्रोतदीप्य–
न्माणिक्यश्रीप्रतानैः परिमिलितमलिश्यामलं कोमलं यत्।
प्रोद्यत्सूर्यांशुराजन्मरकतमुकुराकारचोरं मुरारे–
र्गाढामागामिनीं नः शमयतु विपदं गंडयोर्मंडलं तत् ॥ 38 ॥

वक्त्रांभोजे लसंतं मुहुरधरमणिं पक्वबिंबाभिरामं
दृष्ट्वा द्रष्टुं शुकस्य स्फुटमवतरतस्तुंडदंडायते यः ।
घोणः शोणीकृतात्मा श्रवणयुगलसत्कुंडलोस्रैर्मुरारेः
प्राणाख्यस्यानिलस्य प्रसरणसरणिः प्राणदानाय नः स्यात् ॥ 39 ॥

दिक्कालौ वेदयंतौ जगति मुहुरिमौ संचरंतौ रवींदू
त्रैलोक्यालोकदीपावभिदधति ययोरेव रूपं मुनींद्राः ।
अस्मानब्जप्रभे ते प्रचुरतरकृपानिर्भरंप्रेक्षमाणे
पातामाताम्रशुक्लासितरुचिरुचिरे पद्मनेत्रस्य नेत्रे ॥ 40 ॥

पातात्पातालपातात्पतगपतिगतेर्भ्रूयुगं भुग्नमध्यं
येनेषच्चालितेन स्वपदनियमिताः सासुरा देवसंघाः ।
नृत्यल्लालाटरंगे रजनिकरतनोरर्धखंडावदाते
कालव्यालद्वयं वा विलसति समया वालिकामातरं नः ॥ 41 ॥

लक्ष्माकारालकालिस्फुरदलिकशशांकार्धसंदर्शमील–

न्नेत्रांभोजप्रबोधोत्सुकनिभृततरालीनभृंगच्छटाभे ।
लक्ष्मीनाथस्य लक्ष्यीकृतविबुधगणापांगबाणासनार्ध–
च्छाये नो भूरिभूतिप्रसवकुशलते भ्रूलते पालयेताम् ॥ 42 ॥

रूक्षस्मारेक्षुचापच्युतशरनिकरक्षीणलक्ष्मीकटाक्ष–
-प्रोत्फुल्लत्पद्ममालाविलसितमहितस्फाटिकैशानलिंगम् ।
भूयाद्भूयो विभूत्यै मम भुवनपतेर्भ्रूलताद्वंद्वमध्या–
दुत्थं तत्पुंड्रमूर्ध्वं जनिमरणतमःखंडनं मंडनं च ॥ 43 ॥

पीठीभूतालकांते कृतमकुटमहादेवलिंगप्रतिष्ठे
लालाटे नाट्यरंगे विकटतरतटे कैटभारेश्चिराय।
प्रोद्घाट्यैवात्मतंद्रीप्रकटपटकुटीं प्रस्फुरंतीं स्फुटांगं
पट्वीयं भावनाख्यां चटुलमतिनटी नाटिकां नाटयेन्नः ॥ 44 ॥

मालालीवालिधाम्नः कुवलयकलिता श्रीपतेः कुंतलाली
कालिंद्यारुह्य मूर्ध्नो गलति हरशिरःस्वर्धुनीस्पर्धया नु ।
राहुर्वा याति वक्त्रं सकलशशिकलाभ्रांतिलोलांतरात्मा
लोकैरालोक्यते या प्रदिशतु सततं साखिलं मंगलं नः ॥ 45 ॥

सुप्ताकाराः प्रसुप्ते भगवति विबुधैरप्यदृष्टस्वरूपा
व्याप्तव्योमांतरालास्तरलमणिरुचा रंजिताः स्पष्टभासः ।

देहच्छायोद्गमाभा रिपुवपुरगुरुप्लोषरोषाग्निधूम्याः
केशाः केशिद्विषो नो विदधतु विपुलक्लेशपाशप्रणाशम् ॥ 46 ॥

यत्र प्रत्युप्तरत्नप्रवरपरिलसद्भूरिरोचिष्प्रतान–
स्फूर्त्यां मूर्तिर्मुरारेर्द्युमणिशतचितव्योमवद्दुर्निरीक्ष्या ।
कुर्वत्पारेपयोधि ज्वलदकृशशिखाभास्वदौर्वाग्निशंकां
शश्वन्नः शर्म दिश्यात्कलिकलुषतमःपाटनं तत्किरीटम् ॥ 47 ॥

भ्रांत्वा भ्रांत्वा यदंतस्त्रिभुवनगुरुरप्यब्दकोटीरनेका
गंतुं नांतं समर्थो भ्रमर इव पुनर्नाभिनालीकनालात्।
उन्मज्जन्नूर्जितश्रीस्त्रिभुवनमपरं निर्ममे तत्सदृक्षं
देहांभोधिः स देयान्निरवधिरमृतं दैत्यविद्वेषिणो नः ॥ 48 ॥

मत्स्यः कूर्मो वराहो नरहरिणपतिर्वामनो जामदग्न्यःकाकुत्स्थः
कंसघाती मनसिजविजयी यश्च कल्किर्भविष्यन् ।
विष्णोरंशावतरा भुवनहितकरा धर्मसंस्थापनार्थाः
पायासुर्मां त एते गुरुतरकरुणाभारखिन्नाशया ये ॥ 49 ॥

यस्माद्वाचो निवृत्ताः सममपि मनसा लक्षणामीक्षमाणाः
स्वार्थालाभात्परार्थव्यपगमकथनश्लाघिनो वेदवादाः ।
नित्यानंदं स्वसंविन्निरवधिविमलस्वांतसंक्रांतबिंब–

च्छायापत्यापि नित्यं सुखयति यमिनो यत्तदव्यान्महो नः ॥ 50 ॥

आपादादा च शीर्षाद्वपुरिदमनघं वैष्णवं यः स्वचित्तेधत्ते
नित्यं निरस्ताखिलकलिकलुष संततांतः प्रमोदम् ।
जुह्वज्जिह्वाकृशानौ हरिचरितहविः स्तोत्रमंत्रानुपाठै–
स्तत्पादांभोरुहाभ्यां सततमपि नमस्कुर्महे निर्मलाभ्याम् ॥ 51 ॥

मोदात्पादादिकेशस्तुतिमितिरचिता कीर्तयित्वा त्रिधाम्न
पादाब्जद्वंद्वसेवासमयनतमतिर्मस्तकेनानमेद्य।
उन्मुच्यैवात्मनैनोनिचयकवचक पंचतामेत्य भानो–
र्बिंबांतर्गोचर स प्रविशति परमानंदमात्मस्वरूपम् ॥ 52 ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ श्री विष्णु पादादिकेशांतवर्णण स्तोत्रं संपूर्णम् ।